# संस्कृतशिल्पशाला 7,8

## (उपजिल्लास्तरम्)

प्रथमदिनम्

9.30 — 9.45

पञ्जीकरणम्

9.45-10.30

उद्घाटनसभा।

अध्यापकः उद्देश्यानि बोधयति ।

- शुद्धोच्चारणस्य प्राधान्यम्।
- पदानां विवेचनसामर्थ्यम्।
- वाक्यरचनासामत्थ्र्यम्।
- संभाषणसामत्थ्र्यम्।

<u>10.30 — 11.15</u>

<u>प्रथमसत्रम्।</u>

प्रयुक्तिपुरुषः सान्द्रमुद्रिकाद्वारा **नामशब्दगानं (अनुबन्धः 1,2)** श्रावयति ।अध्यापिका छात्राः च अनुगायन्ति । अनन्तरं गाने विद्यमानानि नामपदानि अकारान्तानि पूर्वं विद्यालयशिल्पशालायां वर्गीकृतानि खलु। प्रदत्तं **पदसञ्चयं** दृष्ट्वा पदानि अकारान्त-आकारान्त-इकारान्त-ईकारान्त-उकारान्त- ऊकारान्त-ऋकारान्त-क्रमेण विविच्य लेखनाय निर्दिशति ।

**अनुबन्धः 3 पदसञ्चयः**
तदर्थम् अभ्यासपत्रिकां (वर्क षीट्ठ 1) ददाति ।
प्रदत्तानां केषाचञ्चन पदानाम् एकवचन-द्विवचन-बहुवचनरूपाणि लेखितुं निर्दिशति
वर्क् षीट्ट् 2
उदा -
इकारान्तः ऋकारान्तः
मुनिः मुनी मुनयः , माता मातरौ मातरः

एवम् अन्येषां पदानाम् एकवचन-द्विवचन-बहुवचनरूपाणि लेखनीयानि ।

11.15-11.30 चायापानम्।

11.30-1.00
**क्रियापदगानं (अनुबन्धः 4)** श्रावयति । वर्तमानकालक्रियापदानां (लट्) भूतकालक्रीयारूपेण (लङ् ) परिवर्त्तनं कर्त्तुं निर्दिशति ।
लकारपरिवर्त्तनाय अभ्यासपत्रिकां (वर्क षीट्ठ3) ददाति ।
उदा - (लट्) (लङ्)
नृत्यति अनृत्यत्

वर्तमानकालक्रियापदघटितां कथामेकां स्लड् द्वारा प्रदर्शयति ।
**अनुबन्धः 5 कथा**
एतां कथां लङ्लकाररूपेण परिवर्त्य लेखितुं निर्दिशति ।परिवर्तितां कथां परस्परमूल्यनिर्णयाय निर्दिशति ।
वर्क् षीट्ट् 4

**मध्याह्नवेला**
लकारार्थानां दृढीकरणाय लकारकथाम् अवतारयति ।

अनुबन्धः 6 लकारकथा

तदनन्तरं लोट् , लृट् , विधिलिङ् लकाराणां रूपपरिचयः दीयते ।

| | लोट् | लृट् | विधिलिङ् |
|---|---|---|---|
| नृत्यति - | नृत्यतु | नर्त्स्यति/नर्तिष्यति | नृत्येत् |

सूचितान् लकारान् उपयुज्य यावच्छक्यं वाक्यानि निर्मातुं प्रेरयति ।

मातृकानुसारं क्रियापदानां एकवचन-द्विवचन-बहुवचनानां लेखनाय अभ्यासपत्रिकां (वर्क षीट्ट 4) ददाति।

उदा -

(लङ्) अपठत् अपठतां अपठन् (लोट्) पठतु/पठतात् पठतां पठन्तु
(लृट्) पठिष्यति पठिष्यतः पठिष्यन्ति (विधिलिङ् ) पठेत् पठेतां पठेयुः

एकैकस्य प्रत्येकं वर्क् षीट्टू उपयोक्तव्या ।

अनुबन्धाः 1,2,4 एतेभ्यः गानेभ्यः नामपदानि, क्रियापदानि च यथेच्छम् उपयुज्य छात्राः वाक्यरचनां कुर्वन्तु । (मातृका) अध्यापकः चार्ट् पत्रिकायां लिखति ।

वर्क् षीट्ट् 5

उदा - रीना नृत्यति

कर्तृ-कर्म-क्रियापदानि उपयुज्य लघुवाक्यलेखनाय अध्यापकः प्रेरयति ।

वर्क् षीट्ट

उदा - गजः वनं गच्छति।

छात्रान् संघीकृत्य लधुवाक्यानि रचयितुं विविधविषयाणि ददाति ।

- शाकापणम् ।
- बस् याननिस्थानम् ।
- आतुरालयः।
- कार्यालयः।
- भोजनशाला।
- क्षौरशाला।

एतेषाम् अवतारणम् अपि छात्रसंघैः कार्यम् । मूल्यनिर्णयम् अन्ये संघाः कुर्युः ।

<u>द्वितीयदिनम्</u>

प्रथमसत्रम् । 9.45-11.15

अध्यापकः अधोदत्तानि सप्त वाक्यानि अवतारयति । चार्ट् पत्रिकायां लिखति।

१)अध्यापकः ददाति।
२)अध्यापकः पुस्तकं ददाति ।
३)अध्यापकः स्वहस्तेन पुस्तकं ददाति।
४)अध्यापकः स्वहस्तेन पुस्तकं छात्राय ददाति।
५)अध्यापकः गृहात् आनीतं पुस्तकं स्वहस्तेन छात्राय ददाति।
६)अध्यापकः गृहात् आनीतं स्वस्य पुस्तकं स्वहस्तेन छात्राय ददाति।
७)अध्यापकः गृहात् आनीतं स्वस्य पुस्तकं विद्यालये स्वहस्तेन छात्राय ददाति।

| | |
|---|---|
| अध्यापकः | प्रथमा |
| पुस्तकं | द्वितीया |
| स्वहस्तेन | तृतीया |

छात्राय चतुर्थी
गृहात् (आनीतं) पञ्चमी
स्वस्य षष्ठी
विद्यालये (ददाति)- सप्तमी

विविधानि पदानि स्वीकृत्य सप्तसु विभक्तिषु यथेच्छं वाक्यनिर्माणाय अध्यापकः निर्दिशति। वर्क् षीट्ट् 7

चायापानं 11.15-11.30

<u>द्वितीयसत्रम् 11.30 -1.00</u>

अध्यापकः **किंशब्दगानम्** आलपति (अनुबन्धः 4)। गानं श्रुत्वा/पठित्वा प्रश्नवाचकशब्दानां नाम्नां लेखनाय निर्दिशति । प्रश्नवाचकशब्दानां अर्थं , प्रयोगसन्दर्भं च बोधयित्वा उपर्युक्तवाक्यं आधारीकृत्य अध्यापकः प्रश्नान् पृच्छति ।
कः ददाति -अध्यापकः
किं ददाति - पुस्तकं
एवं रीत्या प्रश्ननिर्माणाय निर्दिशति ।अध्यापकः आवश्यकं साहाय्यं ददाति।

भोजनवेला 1.00 -2.00

<u>तृतीयसत्रम् । 2.00 -4.00</u>

छात्रान् सङ्घान् कृत्वा एकैकस्य सङ्घस्य अधोदत्तानि प्रवर्त्तनानि दीयन्ते ।

- साक्षात्कारः (अभिमुखप्रश्नावली)।
- अध्यापकस्य छात्रस्य मिथः संभाषणणम्।
- भित्तिपत्रिकारचना।
- विज्ञाप्तिपत्ररचना।
- अनुमोदनपत्रिकानिर्माणम्।

- अनुमोदनसभा।
- उपहारं स्वीकृत्य छात्रस्य प्रतिवचनम्।
- छात्रैः सह विजयिनः संभाषणम्।
- दैनिकी।
- पत्रवार्त्ता।
- आकाशवाणीवार्त्तावतारणम्।
- दृश्यमाध्यमवार्त्तावतारणम्।

एतानि विलिख्य प्रत्येकं संघः अवतारयति । एकस्य संघस्य अवतरणसमये अन्ये संघाः मूल्यनिर्णयं कुर्वन्ति।

अनुबन्धः 1

नामशब्दगानं

अर्क-हिमालय-शुक्र - दिवाकर -नक्र -तिमिंगल - मर्कट देश -
कुक्कुट- कूर्म- विदूषक _सैनिक- नाविक- याचक-वासर-हंस -
विघ्न _विनायक - पाचक _नर्त्तक-
नायक _कर्षक _गायक _हरिण -
वृश्चिक _शैल _जलाशय _लेखक -
धनिक _पितामह _शिष्य _मनुष्य -
सर्प्प _समूह- विचार _सरोवर -
दूषक _वञ्चक -हस्त _वियोगाः

अनुबन्धः 2

अन्नमक्षरं सुभाषितं प्रदर्शनं वनं
वस्त्रमौषधं फलं बलं मुखं सुखं भयं
साधनं समापनं धनं चरित्रम् आसनं
प्रवर्तनं पलायनं निवेदनं च ताटनं
अक्षरं कुलं दिनं तृणं मलं मनोरथं
चक्रमायुधं जलं च पायसं नपुंसकं

अनुबन्धः 3

पदसञ्चयः

अनुबन्धः 4

क्रियाशब्दगानं

आर्या धावति सीता पिबति च
लिखति च पद्यं रुक्साना
क्रीडति रीना पठति सुमित्रा
पचति पवित्रा फात्तीमा
हसति च धन्या मिलति सुलेखा
षीबा सिञ्चति क्षालयति
माता वपति च अक्का वदति

अल्ला अम्वा परिहसति
नृत्यति कमला गायति विमला
काञ्चनमाला पतति शनैः
सुषमा कर्षति सीता यच्छति
अवति च वसुधा भ्रमति सदा
तपति च गिरिजा तर्जति लसिता
गूहति गंगा पूतजला
क्वणति च वीणा नमति च सौम्या
क्षरति च यमुना तरलजला
तरति च तीर्थ्या अटति च रोजा
एवं स्त्रीजनमखिलं कर्म
विविधं कुरुते कुत्रापि

अनुबन्धः 5

किं-शब्दगानं

कुतः आगच्छति मित्र भवान्?
आगच्छामि मम भवनात्।
रात्रौ गच्छति कुत्र सखे?
आपणमधुना गच्छामि।

किमर्थम् आपणगमनं ते?
आवश्यकमपि पत्राणि।
किं तव हस्ते मम मित्र?
मामकहस्ते करदीपः।
(एकहोरानन्तरम्)
कदा भवान् प्रत्यागतवान्?
अधुना प्रत्यागच्छामि।
कियद् अपि मूल्यं पत्राणाम्?
रूपाद्वयमिह पत्रस्य।
कथम् अयिप्रत्यागमनं ते?
बस्यानेनात्रागतवान्।
अस्तु सखे ते शुभरात्रिः
पुनर्मिलावः शुभरात्रिः ।।

अनुबन्धः 6
लकारकथा